1

...म: ... शलमस्त ... ...
...किमाश्रयेऽक्तुम् १ ... ...त्वार्थ्ये ...माधिकारि...
...स्थानत्रयनिर्माणतद्भवलोकने समर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्...
...न्तसंग्रह मात्मबोधाख्यं प्रकरणं निर्दिदिक्षुः प्रतिजानीते तपोभिः क्षीण...
...नां शान्तानां वीतरागिणाम् मुमुक्षूणामपेक्ष्योयमात्मबोधो विधीयते १ ...
...चान्द्रायणानि स्मैः मितिकानुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागा...न्त...
करणादोषापेक्षानैनित्यनैमित्तिकैरेव रेवकुर्वाणोऽरिन्तपमिति वचनात् श्रत
एवं शान्तानां श्रन्तोमितापायानां वीतरागिणां मिहामुत्रार्थफलभोगरहितानां मु
मुक्षूणां संसारबन्धमोचने कृतप्रयत्नानां पथ्योकसाधनसंख्यानोमयमात्मबो
धोविधीयते विधिमुखेनावश्यकतयाप्रतिपाद्यत इत्यर्थः ननुत्तपोयोगमं
त्रयोगाद्यनेकसाधनेषुसत्सु मोक्षं प्रति बोधएव कि मिति प्राधान्येनोच्यतेऽत्र

निरस्य परिपूर्णस्याद्वितीयस्यात्मनः अज्ञानपरिकल्पितो वाक्यशरीराध्यासकृतपरिच्छिन्न
त्वमविवेककृतमेव न तु तत्त्वदृष्ट्या अतो विवेकेनाविवेकहानादात्मा केवल एव स्वप्रकाशते मे
घावरणाभावे भानुवदित्यर्थः नन्वात्मनोऽद्वैतसिद्धिरस्तु कावृत्ति ज्ञानेन द्वैतसिद्धिरित्या
ह अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणु
वत् ५ अज्ञानकार्यभूतै रहमादिभिः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं ज्ञा
नं कृत्वा चिरकालाभ्यासवशात् अस्यहननद्वारा तत्कार्यान्तःकरणादिकं निःशेषं नाश
यित्वा स्वयमेव नश्यति अज्ञानकार्यत्वात् वृत्ते तत्र प्रतिबिम्बितं ज्ञानमात्माभासत्वात्
आत्मन्येवैक्यं भवति तदानीमद्वय एवात्मा प्रकाशते यथा कतकरेणुराविलं जलं निर्मलं
कृत्वा स्वयमेव नश्यति तद्वदित्यर्थः ५ ननु अपरोक्षतयानुभूयमानस्य संसारस्य कथमसत्यं
त्वासत्त्वं प्रत्यक्षविरुद्धमित्याशंक्य स्वप्नदृष्टान्तेनास्य मिथ्यात्वं साधयति संसार इति संसारः
स्वप्नतुल्यो हि रागद्वेषादिसंकुलः स्वकाले सत्यवद्भाति प्रबोधेऽसत्यवद्भवेत् ६ राग

त्याह १ बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् । पाकस्य वह्निवज्ज्ञानं विना मोक्षो न
सिध्यति २ तपोयज्ञकर्मयोगादिसाधनानि परंपरया क्रमेण ज्ञानद्वारा मोक्षं साधयन्ति ज्ञानं तु
स्वजन्मसमकालमेव तज्ज्ञानं निःशेषं नाशयित्वा मुमुक्षुं स्वराज्ये अभिषेचयति अतोऽन्यसा
धनेभ्यो ज्ञानस्य प्राधान्यमुक्तम् तदेव दृष्टान्तेन द्रढयति पाकस्येति यथा लोके पचनक्रि
यायाः काष्ठजलभाण्डादिसाधनेषु सत्स्वपि वह्निं विना पाको न निष्पद्यते तद्वद् ज्ञानं विना
मोक्षो न सिध्यतीत्यर्थः २ ननु कर्मणामविरोधशक्तिमत्त्वात् कर्मैव किंचिदज्ञानं नाशय
ति किमात्मज्ञानेनेत्याशंक्य कर्मज्ञानयोर्विरोधाभावान्नैवमित्याह अविरोधितया क
र्म नाविद्यां विनिवर्तयेत् विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ३ कर्मणोऽविद्याविरो
धाभावाद् अज्ञानं नाशयितुं न क्षमते विद्या पापाः प्रकाशरूपत्वात् अन्धतमः तेजःपुंज इव ना
शयितुं क्षमेत्यर्थः ३ ननु प्रतिशरीरमात्मा परिच्छिन्न इवोपलभ्यते कथमस्य कैवल्यमि
त्यत आह परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः स्वयंप्रकाशते ह्यात्मा मेघापायेंऽशुमा

३

व्यक्तयः सर्वोपादानभूते परमेश्वरे हेम्नि कटकमुकुटपदपट्टवत्कल्पिता एव ब्रह्मणि आश्रि
त्या इत्यर्थः उक्तमर्थं साकाशदृष्टान्तेन द्रढयति यथाकाश इति हृषीकेशो नानोपाधिगतो विभुः
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत् ॥ ८ ॥ हृषीकेशः मनःप्रभृतिसर्वेन्द्रियप्रवर्त्तकः
नियामको वा सर्वगतः परमेश्वरः स्वमायया परिकल्पित नानाविधोपाधिषु प्रतिबिम्बि
तः सन् नानेव भाति तन्नाशे सति आत्माभेदज्ञानेन तेषां मायापरिकल्पितदेहाद्युपाधीनां
॥३॥ नाशे सति केवल एक एव भाति यथा एकस्याकाशो घटाद्युपाधिषु एक एव नानाविधो भवति ॥३॥
उपाधिलयादेक एव भातीति तद्वदित्यर्थः ॥ ९ ॥ ननु सर्वदेहेषु तत्तज्जात्यादिभिरनुवर्तस्य कथं नित्य
मुक्तत्वमुच्यते तत्राह नानोपाधिवशादेव जाति [illegible] वर्णाश्रमादयः आरोपिता मायाक
ल्पिताः ननु स्वतः यथाम्बुभाव माधुर्य्यं जलं कटुतिक्तमधुराम्लरक्तपीतादिद्रव्योपेते स
न् तद्रूपं भवति ननु स्वरूपे रोप्यसर्पः आत्मनो विद्यापरिकल्पितोपाधित्रयमध्ये स्थूलो
पाधिमाह पंचीकृतमहाभूतसंभवं कर्मसंचितम् शरीरं सुखदुःखानां भोगायतनमु

दुःखादिभिः संकुलायमानः संसारः स्वकाले स्वस्वकारणाभूताज्ञाने स्थिते सति तावन्मिथ्याभू
तोप्ययं संसारः सन्निवाभाति प्रबो[illegible]धेसति वाक्यश्रवणादात्मतत्वज्ञानोत्पत्तौ असन्नेव भ
वति तत्र दृष्टान्तः स्वप्नानुभूति स्वप्नो हि यावन्निद्रानुभूयते तावन्मिथ्याभूतोपि सत्यप्र
थाभवति प्रबोधे निद्रानाशे मिथ्याभवतीत्यर्थः जगन्मिथ्यात्वमेव दृष्टान्तान्तरेण दृढयति
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ७
यथा यावन्नीलपृष्ठत्रिकोणत्वादिविशेषज्ञानं नोत्पद्यते तावत् रजतज्ञानं सत्यमेवा
नुभूयते तथा सर्वाधिष्ठानभूतं सच्चिदानन्दरूपं ब्रह्म यावन्न ज्ञायते साक्षात्कारेणानुभूय
ते तावज्जगदाकारेण परिणतः संसारः सत्य इव भ्रान्त्या दृश्यते इत्यर्थः ७ सर्वं दृश्यप्र
पंचजातं ब्रह्मण्येव कल्पितमिति प्रतिपादयति सच्चिदात्मन्यनुस्यूते नित्ये विभौ
प्रकल्पिताः व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ८ सत्यज्ञानानन्दात्मनि नि
त्ये सर्वानुस्यूते विभौ व्यापके ब्रह्मणि [illegible] मादयो विविधाभि

इत्याभासस्य पंचकोशादियोगेन तत्तन्मय इवस्थितः शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा
१४ अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः पंचकोशाः आदिशब्देनाशनापिपासादी
नां ग्रहणं एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इवस्थितः आत्मा शुद्धः ननु तेषु वस्तुतो रंजितः
वदेहोपि स एवेषः पुरुषोन्नरसमय इत्यादिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिरूपं ब्रह्म सूचय
ति ननु तत्त्वदृष्ट्या निर्मलस्फटिको नीलपीतवस्त्रादियोगे न त[illegible]त्तन्मय इवाभवति वस्तु व ५
तो नास्ति तेन रंजनात्तद्वदित्यर्थः १५ असंगात्मस्वरूपज्ञानविवेचनप्रकारमाह वपुस्तुषादि
४ भिः कोशैर्युक्तं युक्त्यावघाततः आत्मानमंतरं शुद्धं विविच्यात्तण्डुलं यथा १५ पंचकोशैः ४
तावदात्मनि स्थितवपुः स्थूलशरीरं तुषादिभिर्युक्तं युक्त्यावघाततः हननात् शुद्धात्मानं
तण्डुलमिव विविच्यात् विवेकेन जानीयात् कथमयं स्थूलदेहो नात्मा भूतकार्यत्वात् घटव
त् सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूलवदित्यनुमानादिना तेभ्यो कोशेभ्यो भिन्नमात्मानं विविच्या
ज्जानीयादित्यर्थः १५ ननु आत्मा सर्वतः तर्हि किं सर्वत्र सर्वैर्न दृश्यते इत्यत्राह सदा सर्वगतो
प्यात्मा न सर्वत्रावभासते बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् १६ आत्मा सर्वगतोपि सर्वत्र

च्यते ११ पंचानां भूतानां द्विधा प्रत्येकं विभज्य तत्रैकैकमर्द्धं चतुर्धा विभज्य स्वांशं परित्यज्य ते
सु योजनं पंचीकरणं एवं पंचीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः संभवो यस्य प्रारब्धक
र्मभिः संचितं स्थूलशरीरं सुखदुःखानामायतनं भोगस्थानं प्रत्यगात्मन इति सूक्ष्मोपा
धिमाह पंचप्राणा मनो बुद्धिः दशेन्द्रियसमन्वितम् अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसा ग४
धनम् १२ पंचप्राणा एकस्यैव महाप्राणस्य प्राणादयो वृत्तयः ज्ञानेन्द्रिय कर्मेन्द्रिय
भेदेनेन्द्रियाणि दश मनः शब्देन संकल्पविकल्पात्मिका करणवृत्तिर्बुद्धिर्निश्चयात्मिका एतैः संयुक्तम
पंचीकृतसूक्ष्मभूतोत्थं जातं सूक्ष्मांग लिंगशरीरं सुखदुःखभोगसाधनमित्यर्थः १२ तृतीयं
कारणोपाधिमाह अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते उपाधित्रितयादन्यमात्मा
नमवधारयेत् १३ सदसद्भ्यामनिर्वाच्याऽविद्यानामाऽपि भूता कारणोपाधिरुच्यते सा च समष्टि
व्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वात् कारणोपाधिरुच्यते उपाधित्रितयकथ
नेन प्रयोजनमाह उपाधि[illegible] [illegible]मानमवधारयेत् ज्ञानीया
दित्यर्थः १३ ननु अन्नमयादिषु कोशेषु व्याप्यतत्तन्मयतयाऽस्थितस्य कुतो नित्यत्वमुच्यते

तन्यमाश्रित्य देहेन्द्रियमनोधियः स्वकीयार्थेषु वर्त्तन्ते सूर्यालोकं यथा जनाः १८ नित्यज्ञान
स्वरूपमात्मचैतन्यमाश्रित्य देहेन्द्रियमनोबुद्धयः स्वकीयार्थेषु वर्त्तन्ते यथा जनाः प्रा
णिनः सूर्यप्रकाशमाश्रित्य व्यापारेषु व्यवहरंति अतः चैतन्यज्ञानमात्मनस्त्व देहेन्द्रि
याद्यपस्तु जडएवेत्यर्थः १९ नन्वहं जातोस्मि बाल्यकौमाराद्यवस्था अनुभवामि पश्या
मीत्यादिना वस्तुतमनुभूयमानस्यात्मनः कथमविकारित्वमुच्यते इत्यत आह देहेन्द्रिय
गुणान् कर्म्माण्यमले सच्चिदात्मनि अध्यस्यंत्यविवेकेन गगने नीलतादिवत् २०
देहेन्द्रियमनोबुद्धिधर्मांश्च गुणांश्च सत्वादीन् कर्मेन्द्रियव्यापारान् मिथ्यातादात्म्येन
स्थिते निर्मले असंगरूपे सच्चिदात्मनि धर्मा न भवंति अपितु देहादीनामित्यर्थः ननु
कर्तृत्वभोक्तृत्वादिकमात्मन्यवस्तुतमनुभूयमानत्वात् दुर्वारमित्याशंक्य तत्कल्पितत्वेनमिथ्य
त्वाह अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि कल्प्यन्तेऽम्बुगते चन्द्रे चलना

दि यथाम्भसः २१ अज्ञानवशान्मानसोपाधिः तस्यैव कर्तृत्वादयो धर्माः न त्वात्मनः

५ 5 ५

व्याप्य स्थितोऽपि जडैर्बहिः प्रवृत्तैस्तैर्न प्रकाश्यते रागादिभिरविच्छायां बुद्धावेवावभासते न सर्व
त्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः १६ देहे स्थितस्यात्मा
न औदासीन्ये राजदृष्टान्तेनाह देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् तद्वृत्तिसाक्षिणं
विद्यादात्मानं राजवत्सदा १७ देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो जडपरिणामिदृश्येभ्यो विलक्षणम् शुद्धा
त्मानं तद्वृत्तीनां साक्षितया स्थितं यथा राजा स्वनगरेषु स्थितेषु मंत्रिषु व[illegible]र्तमानेषु स्व
यं साक्षितया तान् पश्यति तिष्ठति तद्वदेव ज्ञानी विद्यादित्यर्थः १७ नन्वात्मनोऽविकारित्वमयु
क्तं सर्वदा व्यापारवान् दृश्यते तत्राह व्यापृतेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनाम् दृश्यते
ऽभ्रेषु धावत्सु धावन्निव यथा शशी १८ इन्द्रियादिषु स्वस्ववि[षये]षु व्यापृतेषु सत्सु आ
त्मा व्यापारीवाविवेकिनां गुरुशास्त्राद्युपदेशरहितानां दृश्यते न तु तत्त्वदृशां यथा मेघखंडे
षु वायुवशाद्धावत्सु चन्द्रोऽपि धावतीव लौकिकैर्दृश्यते न तु चन्द्रो धावति तथात्मापीत्यर्थः
ननु देहेन्द्रियमनोबुद्धयोऽपि स्वेन नाश्यन्ते किमात्मानमाश्रित्य वर्त्तन्ते तत्राह आत्मचै

स्यच्चांशद्वयांशः आत्माभासः बुद्धेर्निश्चय एतद्द्वयमविवेकेन संयोज्यासंगस्यात्म
नः केनापि संयोगो नास्त्येवं तथाप्यज्ञानवशात् मेलनं संभवो जानामीति प्रत्ययः
अहंकारवृत्तिः प्रवर्त्तते तत्केवले प्रत्यगात्मनि किंचिद्विकारो नास्तीति भावः एतदेव
स्पष्टयति २४ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति जीवः सर्वमलं ज्ञात्वा क
र्त्ता द्रष्टेति मुह्यति २५ आत्मा स्वभावादेव विकारशून्यः बुद्धेः कदाचिदपि बोधांशो के
वलो नास्ति तथापि जीवः साभासाहंकारः सर्वसामासांतःकरणावजीनामेकत्वं तप्ताय
सपिंडवदेकत्र संगतमेवमेलनमसत्यं ज्ञात्वा देहेन्द्रियादिकमहमिति विचार्य अहं
 कर्त्ता अहं द्रष्टेति मुह्यति भ्रांतो भवतीत्यर्थः आत्मास्वरूपमेव स्वस्मिन्नविवेकेना
न्यधर्मानारोप्य बिभेतीत्याह २५ रज्जुसर्पवदात्मानं जीवो ज्ञात्वा भयं वहेत् ना
हं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् २६ यथांधकारादौ विकाररहितर
ज्वादौ सर्पभ्रमारोपज्ञात्वा भयकंपादि वहेत् एवमात्मापि स्वस्मिन्नजीवत्वमा

दात्मनि कल्पितं तेपयांभसः २१ चलनादिकमंबुनि प्रतिफलिते चन्द्रमसि विवेकतः कल्पन्ते
तद्वदित्यर्थः २१ रागेच्छासुखदुःखादीनामात्मधर्मा मन्यन्ते वैशेषिकादयः तान्निराक
रोति रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्त्तते सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु ना
त्मनः २२ रागेच्छासुखदुःखा[illegible] प्रपत्नादिकं सर्वं बुद्धेरेव न त्वात्मनः कुपं जाग्रत्स्वप्न
योर्बुद्धौ सत्यां प्रवर्त्तते सुषुप्तौ तस्या बुद्धेर्नाशो कारणो लीनेन न च प्रवर्त्तते तस्माद्बुद्धेरेव
धर्मः न त्वात्मन इति २२ ननु तर्हि आत्मा कीदृशस्वभाव इत्याशंक्य आत्मस्वभावमुप
दिशति प्रकाशोर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता स्वभावं सच्चिदानन्दं नित्यनिर्मल
आत्मनः २३ यथा प्रकाश एवार्कस्य स्वभावः तोयस्य शैत्यं अग्नेरुष्णता तथात्मनो
पि सच्चिदानन्द नित्यनिर्मलस्वभावस्वरूपमित्यर्थः २३ ननु यद्यप्येवं विध आत्मा
तर्हि जानामीति प्रत्ययः कथमित्यपेक्षायामाह आत्मनः सच्चिदंशश्च बुद्धेर्वृत्ति
रिति द्वयम् संयोज्य चाविवेकेन जानामीति प्रवर्त्तते २४ प्रत्यगात्मनः सच्चिदंशो

तदपेक्षा नास्ति तद्धृदि तत्त्वार्थः ननु यदि वेदान्तादिभिरात्मा ज्ञेयो न भवेत्तर्हि आत्मज्ञाने उपा
यान्तरं वाक्यं स उपायः कथ्यत इत्यत आह २८ निषिध्य निखिलोपाधीन्नेति नेतीति वाक्य
7 तः विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः [illegible] व्याख्यात आदेशो नेति नेतीति श्रु
[illegible] निर्गुणं वेदवाक्ये निखिलोपाधीन्निषिध्य [illegible] आत्मानं ज्ञात्वा तत्त्वमसि अयमा
७ त्मा ब्रह्माहमस्मि इत्यादिवाक्यैर्जीवात्मपरमात्मनोरैक्यं ज्ञानं विद्यादित्यनुपात् अनेन ७
प्रकारेण

रोप्य सच्चित्तोपि परिच्छिन्नं ज्ञात्वा भयदुःखसंसारे मग्नो भवति यदा शास्त्राचार्यप्रसादे
न शास्त्रार्थज्ञानमुत्पन्नं भवति तदा विवेकचक्षुषा स्वात्मानमखण्डानन्दं ज्ञात्वा नैकरूपं संप
श्यन् ततो नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखादिरहितः सुखी भवेत् नन्वात्मा
त्मतत्त्वमाभासिपि केवं बुद्धिमनोहंकारादिभिः कथं नावलोक्यते तत्राह २६ आत्मावभासय
त्येको बुद्ध्यादीनीन्द्रियाणि च दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते २७ आत्मा के
वल एक एव सन्नपि बुद्धिमनोहंकारादीनवभासयति तैर्जडैरेभिर्नेत्रादिभिर्नावभास्य
ते यथा एक एव दीपो घटादीन्सर्वानपि प्रकाशयति प्रकाशितैर्घटादिभिर्नावभास्यत इ
त्यर्थः ननु आत्मा बुद्ध्यहंकारादिभिर्नावभास्यते यदि तर्हि आत्मसत्ताने ज्ञानांतरेण भवि
तव्यमित्याशंक्य नेत्याह स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः न दीपस्यान्यदीपे
च्छा यथा स्वात्मप्रकाशने २८ आत्मनो बोधरूपत्वात्स्वबोधे नित्यं सति तस्यात्मनो बोधा
य ज्ञानान्तराये [illegible] न दीपस्य स्वप्रकाशने दीपां